M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref.
Ser. V/21

Title : Tarka Kaumudi

Tarka-Kaumudi

by

Laugakshi Bhāskara.

V/21

Incomplete

	:	: Tarka-kaumudi	: Title
	:	: Laugaksi Bhaskara	Author
	:	:	: Editor
	:	:	: Year, Vols.
SK	:	:	: Publisher
V/21	:	: Presented by	: Remarks

Prof. V. R. Trivedi

तर्ककौमुदी

तर्ककौमुदी

श्रीमदिष्टदेवतायै॥ ॥श्रीवासुदेवं नवनीरदाभं रमाधरालंकृतपार्श्वभागं॥ मत्स्या
दिरूपैः कृतलोकतोषं विघ्नानिदानं परमं नमामि॥१॥ स्वपादमुनिं नत्वा कणादं
च ततः परं॥ लौगाक्षिणा भास्करेण तन्यते तर्ककौमुदी॥२॥ तत्राभिधेयाः पदा
र्थाः॥ ते च द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तैव॥ द्रव्याणि पृथि
व्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव॥ गुणास्तु रूपरसगंधस्पर्श
संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्र
३द्रवत्व यत्नगुरुत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशतिरेव॥ कर्माण्युत्क्षेपणा
पक्षेपणाकुंचनप्रसारणगमनानि पंचैव॥ सामान्यं द्विविधं॥ परमपरं च॥
नित्यद्रव्यवृत्तयो विशेषास्त्वनंता एव॥ समवायस्त्वेक एव॥ अ ॥१॥

भावो द्विविधः॥ संसर्गाभावोऽन्योन्याभावश्चेति॥ द्रव्यत्वसामान्यवद्गुणवद्वा द्रव्यं॥ गु
२ णत्वसामान्यवान् द्रव्यकर्मभिन्नः सामान्यवान् गुणः॥ कर्मत्वसामान्यवच्चलना
त्मकं वा कर्म॥ नित्यमेकमनेकसमवेतं सामान्यं॥ अपमस्तोभाघ्यारतत इति व्याव
त्तिबुद्धिमात्रहेतुर्विशेषः॥ नित्यः संबंधः समवायः॥ भावभिन्नोऽभावः॥ इति द्रव्या
दिसामान्यलक्षणानि॥ अथ तद्विशेषलक्षणान्युच्यंते॥ पृथिवीत्वसामान्यव
ती पृथिवी॥ रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाप
रत्वगुरुत्वद्रवत्वसंस्कारात्मकचतुर्दशगुणवती॥ सा द्विविधा॥ नित्यानित्या च॥
नित्या परमाणुलक्षणा॥ अनित्या कार्यलक्षणा॥ सापि त्रिविधा॥ शरीरेंद्रियविषय
भेदात्॥ शरीरमपि द्विविधं॥ योनिजमयोनिजं च॥ तत्र शुक्रशोणितसन्निपातज
योनिजमस्मदादीनामस्पष्टमिदं॥ शुक्रशोणितसन्निपातं विना धर्मविशेषस

द्युकत परमाणुमन्नमयोनिजं देवर्षिनामादीनां॥ इंद्रियं गंधग्राहकं घ्राणं नासाग्रवर्ति॥
विषयो मृत्पाषाणस्थावरभेदो त्रिविधः॥ मृत्पाषाणे प्रसिद्धौ॥ स्थावरो वृक्षतृणा
दि॥ अप्त्वसामान्यवत्य आपः॥ रूपरसस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगवि
भागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारात्मकं चतुर्दशगुणवत्यः॥ ता अपि द्वि
धाः॥ नित्यानित्याश्च॥ नित्याः परमाणुलक्षणाः॥ अनित्याः कार्यलक्षणाः॥ ता अपि
त्रिविधाः॥ शरीरेंद्रियविषयभेदात्॥ शरीरमयोनिजं मेववरुणलोके प्रसिद्धं॥ इंद्रि
यं रसग्राहकं रसनं रसनाग्रवर्ति॥ विषयः सरित्समुद्रहिमकरकादिः॥ तेजस्त्वसाम
न्यवत्तेजः॥ रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसं
स्कारात्मकमेकादशगुणवत्॥ तत् द्विविधं॥ नित्यमनित्यं च॥ नित्यं परमाणुलक्षणं॥ अ ॥२॥
नित्यं कार्यलक्षणं॥ तदपि त्रिविधं॥ शरीरेंद्रियविषयभेदात्॥ शरीरमयोनिजं मेवादि
त्यलोके प्रसिद्धं॥ इंद्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति॥ विषयलक्षणं तेजश्चतु

र्विधं॥ भौमदिव्यौदर्याकरजभेदात्॥ पार्थिवेंधनं वह्न्यादि भौमं॥ अबिंधनं सौरविद्यु
द्वानलादि दिव्यं॥ भुक्ताहारपरिणामहेतु जठरानलरूपमुदर्यं॥ सुवर्णरजतादि
आकरजं॥ वायुत्वसामान्यवान्वायुः॥ स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभा
गपरत्वापरत्ववेगसंस्कारात्मकगुणनववान्॥ स द्विविधः॥ नित्योनित्यश्च॥ नित्यः पर
माणुलक्षणः॥ अनित्यः कार्यलक्षणः॥ अनित्यश्चतुर्विधः॥ शरीरेंद्रियविषयप्रा
णभेदात्॥ शरीरमयोनिजं मेव वायुलोके प्रसिद्धं॥ इंद्रियं स्पर्शग्राहकं सर्वशरीरव्या
पित्वक्॥ विषयो महावाय्वादिः॥ शरीरांतःसंचारी वायुः प्राणः॥ स एकोपि क्रियाभेदात्प्रा
णव्यानोदानसमानसंज्ञां लभते॥ ननु शरीरे पंचवायवः॥ मूर्त्तानां समानदेशता
विरोधात्॥ मूर्त्तं चेत् इति निरवयवः परमाणुः॥ स चातींद्रिय एव॥ तदुक्तं॥ जालांतर
स्थसूर्यरश्मौ यत्सूक्ष्मं दृश्यते रजः॥ तस्य षष्ठो भागः परमाणुः स उच्यते॥ इ कादि॥
ति॥ कारणपश्चाद्भाविकार्यं॥ तच्च द्व्यणुकत्र्यणुकभेदेनानंतविधं॥ तत्र द्वयोः परमा

एवोः संयोगात् द्व्यणुकं॥ त्रयाणां द्व्यणुकानां संयोगात् त्र्यणुकं॥ चतुर्णां त्र्यणुकानां सं
योगात् चतुरणुकं॥ एवं पंचाणुकादि॥ भोगायतनमंत्यावयवि शरीरं॥ सुखदुःखा
न्यतरसाक्षात्कारो भोगः॥ द्रव्यानारंभकं कार्यद्रव्यमंत्यावयवि॥ शरीरसंयुक्तं ज्ञानक
रणमतींद्रियमिंद्रियं॥ ज्ञायमानत्वे सति भोगसाधनं विषय इति॥ शब्दसमवायिकार
णमाकाशः॥ शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागवान्॥ स च नाद्यवारे
कः सर्वत्र कार्योपालंभात् विभुः नित्यश्च॥ तथापि कर्णशष्कुल्यवच्छिन्नः सन्
शब्दग्राहकं श्रोत्रेंद्रियात्मकः॥ ज्येष्ठत्वकनिष्ठत्वज्ञानाधीनपरत्वापरत्वानुमेयः का
लः॥ संख्यापरिमाणपृथक्त्वसंयोगविभागवान्॥ सोप्येको विभुर्नित्यश्च॥ तथाप्यु
पाधिभेदात्त्रिविधः॥ अतीतोऽनागतो वर्त्तमानश्चेति॥ तद्व्यक्तिध्वंसविशिष्टकाल ॥३॥
स्तद्व्यक्तेरतीतकालः॥ तद्व्यक्तिप्रागभावविशिष्टः कालस्तद्व्यक्तेरनागतकालः॥ त
द्व्यक्तिध्वंसप्रागभावावच्छिन्नः कालस्तद्व्यक्तेर्वर्त्तमानकालः॥ दूरत्वसन्निहितत्व

न१

ज्ञानाधीनपरत्वापरत्वानुमेया दिक्॥ संख्यापरिमाणपृथक्त्वसंयोगविभागवती॥ सा
प्येका विभ्वी नित्या च॥ तथाप्युपाधिभेदाच्चतुर्विधा॥ प्राची प्रतीची उदीची दक्षि
णा चेति॥ उदयाचलसन्निहिता दिक् प्राची॥ अस्ताचलसन्निहिता दिक् प्रती
ची॥ सुमेरुसन्निहिता दिक् उदीची॥ सुमेरुव्यवहिता दक्षिणा॥ आत्मत्वसा
मान्यवानात्मा॥ स द्विविधः॥ जीवेश्वरभेदात्॥ अनित्यज्ञानादिमान् जीवः॥ सं
ख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म
संस्कारवान्॥ स च सुखदुःखादिवैचित्र्यात्प्रतिशरीरं भिन्नः॥ नित्यज्ञानादि
मानीश्वरः॥ संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धीच्छाप्रयत्नवान्
स चैक एव शरीररहितश्च॥ शरीरे त्वदृष्टाभावात्॥ यद्यस्यापि शरीरं॥ पु
रुषादृष्टेन वानाशरीरस्येवास्मदीयादृष्टेन तच्छरीरस्योत्पन्नसंभवात्॥ न

चास्मदीयपादस्पृष्टेन मुक्तस्यापि शरीरोत्सादः स्यादिति वाच्यं॥ शरीरेंद्रियादे
स्तत्राभावात्॥ अत एव चतुर्भुजत्वादिश्रवणं स्मृत्यादौ संगच्छते॥ द्विविधो
प्यात्मा विभुर्नित्यश्च॥ मनस्त्वसामान्यवन्मनः॥ संख्यापरिमाणपृथक्त्व
संयोगविभागपरत्वापरत्वसंस्कारवत्॥ तच्च सुखाद्युपलब्धिसाधनें
द्रियं प्रतिजीवं भिन्नं॥ अणु नित्यं च॥ इति विशेषलक्षणानि॥ अथ गुण
विशेषलक्षणानि॥ चक्षुर्मात्रग्राह्यजातिमान् गुणो रूपं॥ जातिपदेनाभाववारण
य॥ तच्च शुक्लनीलपीतरक्तहरितकपिलभेदात्षड्विधं॥ शुक्लादि षड्विधं पृथिव्या
मेव॥ शुक्लं च जले॥ शुक्लं भास्वरं तेजसि॥ रसनमात्रग्राह्यजातिमान् रसः॥ स च
मधुरतिक्तकटुकषायाम्ललवणभेदात्षड्विधः॥ षड्विधोपि रसः पृथिव्यामेव॥ म
धुर एव जले॥ घ्राणमात्रग्राह्यजातिमान् गंधः॥ स द्विविधः॥ सुरभिरसुरभिश्च॥ ॥५॥

द्विविधोपि गंधः पृथिव्यामेव॥ त्वङ्मात्रग्राह्यजातिमान् स्पर्शः॥ स त्रिविधः॥ शीतो
ष्णानुष्णाशीतभेदात्॥ शीतो जले॥ उष्णस्तेजसि॥ अनुष्णाशीतः पृथिवीवाय्वोः॥
द्विविधायामपि पृथिव्यां रूपादयश्चत्वारोप्यनित्याः पाकजाश्च॥ तत्राग्नितेजःसं
योगात् तद्वत् श्यामादिनाशेन रक्ताद्युत्पाददर्शनात्॥ तत्रापि पूर्वरूपादिनाश
करूपाद्यंतरोत्पादकः पाकः॥ परमाणुष्वेवेति वैशेषिकमतं॥ द्व्यणुकाद्यवयवेष्व
पीति नैयायिकाः॥ जलतेजोवायुषु च नित्यगता रूपादयो नित्याः अनित्यगताश्चानि
त्याः॥ उद्भूतानुद्भूतभेदेन रूपादयश्चत्वारो द्विविधाः॥ घ्राणचक्षुस्त्वगादावनुद्भूताः॥
उद्भूतास्तु योग्यपृथिव्याद्यारंभकपरमाणुद्व्यणुकत्र्यणुकादौ॥ चित्राचित्रभेदेना
पि ते द्विविधा इति केचित्॥ नीलपीतादिमधुरतिक्तादिसुरभ्यसुरभ्यादिस्तु कुमार
भिन्नावयवारब्धपटादिषु चित्राः॥ अन्यत्राचित्राः॥ गणनाव्यवहारासाधारणं

विच

रणं संख्या ॥ सा द्विविधा ॥ एकानेकवृत्तिभेदात् ॥ तत्रैकत्वमेकवृत्ति ॥ तच्च नित्यगतं
नित्यं ॥ अनित्यगतमनित्यं ॥ द्वित्वादिकमनेकवृत्ति ॥ तच्चानेकत्वविषयापेक्षा
बुद्धिजन्यं तन्नाशनाश्यं चैतन्नित्यमेव ॥ परमाणुद्व्यणुकादावनी ॥ द्वित्वं तु ग
वदपेक्षाबुद्धिजन्यमदृष्टनाशनाश्यं ॥ मानव्यवहारासाधारणकारणं परिमा
णं ॥ तच्चतुर्विधं ॥ अणुह्रस्वं महद्दीर्घं चेति ॥ अणुह्रस्वपरिमाणं परमाणुद्व्यणु
कयोः ॥ महद्दीर्घपरिमाणं त्र्यणुकचतुरणुकादौ ॥ चतुर्विधमपि द्विविधं ॥ नित्य
मनित्यं च ॥ नित्यगतं नित्यं ॥ अनित्यं चानित्यं ॥ तत्त्रिविधं ॥ संख्याजन्यं परिमाण
जन्यं प्रचयजन्यं चेति ॥ तत्र द्व्यणुकपरिमाणं परमाणुद्वित्वसंख्याजन्यं ॥ त्र्यणु
कपरिमाणं च द्व्यणुकत्रित्वसंख्याजन्यं ॥ तत्रावयवगताणुपरिमाणस्यास ॥५॥
समवायित्वेतस्याणुतरत्वप्रसंगात् ॥ परिमाणस्य स्वसमानजातीयोत्कृष्ट

जनकत्वनियमात् ॥ चतुरणुकादिपरिमाणं परिमाणजन्यं ॥ अवयवगतमहत्त्वस्यैवत
त्रासमवायित्वात् ॥ तूलपिंडपरिमाणं प्रचयजन्यं ॥ अवयवानां प्रशिथिलः संयोगः प्र
चयस्तस्यैव तत्रासमवायित्वात् ॥ पृथग्व्यवहारासाधारणकारणं पृथक्त्वं ॥ तदपि द्विवि
धा ॥ एकानेकवृत्तिभेदात् ॥ तत्रैकपृथक्त्वमेकवृत्ति ॥ तच्च नित्यगतं नित्यं ॥ अनित्यग
तमनित्यं ॥ द्विपृथक्त्वाद्यनेकवृत्ति ॥ तच्चानेकत्वं च पृथक्त्वविषयापेक्षाबुद्धिजन्यं तन्नाश ५
नाश्यं ॥ संयुक्तव्यवहारासाधारणकारणं संयोगः ॥ स द्विविधः ॥ कर्मजः संयोगजश्च ॥ क
र्मजोपि द्विविधः ॥ अन्यतरकर्मज उभयकर्मजश्चेति ॥ आद्यः श्येनशैलयोः ॥ द्वितीयस्तु मे
षयोर्मल्लयोर्वा ॥ हस्ततरुसंयोगात्कायतरुसंयोगः संयोगजः ॥ विभक्तव्यवहारासाध
रणकारणं विभागः ॥ सोपि द्विविधः ॥ कर्मजो विभागजश्चेति ॥ कर्मजोपि द्विविधः ॥ अन्यत
रकर्मज उभयकर्मजश्चेति ॥ आद्यः श्येनशैलयोः ॥ द्वितीयस्तु मेषयोर्मल्लयोर्वा ॥ हस्ततरु
विभागात्कायतरुविभागो विभागजः ॥ संख्यादयः पंच सर्वद्रव्यवृत्तयः ॥ परव्यवहारासाधा

रणं कारणं परत्वं ॥ अपरव्यवहारासाधारणं कारणमपरत्वं ॥ ते द्विविधे ॥ कालकृते दिक्कृते
च ॥ योयदपेक्षयाज्येष्ठस्तत्र तदवधिकपरत्वं कालकृतं ॥ योयदपेक्षयाकनिष्ठस्तत्र
तदवधिकमपरत्वं कालकृतं ॥ अत्र कालपिंडसंयोगोऽसमवायी ॥ ज्येष्ठत्वकनिष्ठत्वज्ञा
ननिमित्तं तन्नाशश्च तन्नाशनिमित्तं ॥ एते जन्यद्रव्य एव ॥ योयदपेक्षया दूरस्थस्तत्र
तदवधिकं परत्वं दिक्कृतं ॥ योयदपेक्षयासंनिहितस्तत्र तदवधिकमपरत्वं दिक्कृ
तं ॥ अत्र दिक्पिंडसंयोगोऽसमवायी ॥ दूरत्वसन्निहितत्वज्ञानं निमित्तं ॥ तन्नाशश्च
तन्नाशनिमित्तं ॥ एते मूर्त्तद्रव्य एव ॥ बुद्धित्वसामान्यवती अथ प्रकाशोवाबुद्धिः ॥ साद्वि
विधा ॥ स्मृतिरनुभवश्च ॥ संस्कारजन्यज्ञानं स्मृतिः ॥ यथा मणिकर्णिकास्वविश्वेश्व
र इत्यादि ॥ तत्रस्त्वानुभवः करणं ॥ संस्कारो व्यापारः ॥ न च सोयं देवदत्त इति प्रत्य
भिज्ञायामतिव्याप्तिः ॥ तत्र संस्कारजनितत्वात्स्मृतिरेव हेतुर्न तु संस्कारोपीत्य ॥८॥

तिव्याप्तिविरहात् ॥ स्मृतिभिन्नं ज्ञानमनुभवः घट इति मानत्वानुभवः ॥ स द्विविधः ॥ प्र
मा अप्रमा चेति ॥ प्रमाणानां स्तज्जन्यो यथार्थानुभवो प्रमा ॥ सा अपि द्विधा ॥ अप्रमा सं
शय भेदात् ॥ विपरीतनिर्णयो भ्रमः ॥ यथा पीतः शंखः लोहितः स्फटिक इत्यादि ॥ एकध
र्मिणि विरुद्धनानाकोटिकं ज्ञानं संशयः ॥ यथा दूरवर्त्तिनि ऊर्ध्वे वस्तुनि अयं स्थाणुर्वा पुरु
षो वेति ॥ यथार्थानुभवः प्रमा ॥ फलवत्प्रवृत्तिजनकयोग्यत्वं यथार्थत्वं ॥ सम्यगनुभ
वसाधारणं प्रमाकरणं प्रमाणं ॥ व्यापारवत्कारणं करणं ॥ यथा छिदिक्रियायां प्रतिकु
ठः ॥ तज्जन्यत्वे सति तज्जन्यजनको व्यापारः ॥ यथा कुठारस्य दारुसंयोगः ॥ अनन्य
थासिद्धनियतपूर्ववृत्ति कारणं ॥ यथा तंत्वादिकं पटस्य कपालादिकं घटस्य ॥ अन्य
थासिद्धमन्यत् अनन्यथासिद्धं ॥ अन्यथासिद्धिस्त्रिविधा ॥ येन सहैव यस्य यं प्रतिपू
र्वभावोऽवगम्यते तेन तस्य तत्र अन्यथासिद्धिराद्या ॥ यथा घटं प्रति दंडेन दंडरूपस्य
दंडत्वस्य च ॥ दंडेन सहैव दंडरूपस्य दंडत्वस्य वा घटं प्रति पूर्वभावावग्रहात् ॥ अन्यं प्र

तिपूर्ववर्त्तित्वज्ञानएवयस्यपंप्रतिपूर्ववर्त्तित्वंगृह्यतेतंप्रतितस्यान्यथासिद्धिर्द्वितीया॥यथा
घटंप्रति-आकाशस्यकुलालपितुश्च॥-आकाशस्याकाशत्वेनघटंप्रतिपूर्ववर्त्तित्वं
ग्राह्यं॥आकाशत्वंचशब्दसमवायिकारणत्वं॥तच्चशब्दंनियतपूर्ववर्त्तित्वघटितं॥
तथाचशब्दंप्रतिपूर्ववर्त्तित्वेज्ञातएवघटंप्रतिपूर्ववर्त्तित्वग्रहणात्॥घटंप्रत्याकाशोन्य
थासिद्धः॥एवंकुलालपितुरपिकुलालपितृत्वेनघटंप्रतिपूर्ववर्त्तित्वंनग्राह्यं॥कुला
लपितृत्वंचकुलालजनकपुंस्त्वंतच्चकुलालनियतपूर्ववर्त्तित्वघटितं॥तथाचकुला
लंप्रतिपूर्ववर्त्तित्वेज्ञातएवघटंप्रतिपूर्ववर्त्तित्वग्रहणात्॥घटंप्रतिकुलालपितान्य
थासिद्धः॥अन्यत्रक्लृप्तनियतपूर्ववर्त्तिनएवकार्यसंभवेतत्सहभूतत्वमन्यथासि
द्धिस्तृतीया॥यथाघटविशेषंप्रतिदेशादागतरासभस्यघटविशेषादन्यत्रघटांतरे
क्लृप्तनियतपूर्ववर्त्तिदंडचक्रादेरेवघटविशेषस्यापिसंभवेदंडचक्रादिसहकृ
तोदेशादागतरासभोऽन्यथासिद्धः॥रासभसामान्यस्यचघटसामान्यंप्रति ॥७॥

दंडत्ववारणायानियतपूर्ववृत्तीत्यत्रनियतपदं॥तत्रयथोक्तान्यथासिद्धेरभावात्॥नहिघट
सामान्यादन्यत्रपटादौक्लृप्तनियतपूर्ववर्त्तितंतुवेमादेर्घटसामान्यस्यसंभवः॥येनयथो
क्तान्यथासिद्धिःस्यात्॥नियतपूर्ववर्त्तित्वंच-अव्यवहितपूर्वक्षणावच्छेदेनकार्यदे
शेसत्वं॥नचैवंरासभसामान्येऽत्यन्तोनातिव्याप्तिरितिसंक्षेपः॥तच्चकारणंत्रिविधं॥सम
वाय्यसमवायिनिमित्तभेदात्॥तत्रयत्समवेतंकार्यंभवतितत्समवायिकारणं॥यथातंतवःपटस्य
कपालानिघटस्य॥पटघटादिश्चस्वगतरूपादेः॥समवायिकारणंप्रत्यासन्नंकारणमसम
वायिकारणं॥यथातंतुसंयोगःपटस्य॥तस्यपटसमवायिकारणेषुतंतुषुप्रत्यासन्नत्वात्का
रणत्वाच्च॥एवंतंतुरूपादिपटरूपादेः॥तस्यापिपटरूपादिसमवायिकारणेपटेप्रत्यास
न्नत्वेनप्रत्यासन्नत्वात्कारणत्वाच्च॥समवाय्यसमवायिकारणातिरिक्तंकारणंतावन्नि
मित्तकारणं॥यथातुरीवेमादिकंपटस्य॥दंडचक्रादिकंघटस्य॥तत्रप्रमाणंद्विविधं॥प्र
त्यक्षमनुमानभेदात्॥शाब्दादेश्चानुमानविधयैवप्रामाण्यमितिवैशेषिकमतं॥चतुर्विध

मितिनैयायिकाः॥ तदुक्तंसूत्रकृता॥ सेश्वरानुमानोपमानशाब्दाश्चैतुप्रमाणानि॥ प्रत्यक्षप्रम
करणंप्रत्यक्षं॥ तच्चेंद्रियात्मकं॥ इंद्रियार्थसन्निकर्षजन्यंज्ञानंप्रत्यक्षं॥ तत्द्विधं॥ सविकल्प
कनिर्विकल्पकभेदात्॥ विशेषणविशेष्यावगाहि×संबंधान×ज्ञानंनिर्विकल्पकं॥ तच्च
घटघटत्वेइत्याकारकमतींद्रियं॥ नचात्रमानाभावः॥ तदसत्वेऽनुत्पत्तेः सविकल्पस्यापिघटइतिवि
शिष्टज्ञानंनस्यात्॥ विशेषणीभूतस्यघटत्वस्याज्ञानात्॥ विशेषणज्ञानंविनाविशिष्ट
ज्ञानानुदयेनतस्यतद्धेतुत्वात्॥ प्रत्यक्षंपुनरपिद्विविधं॥ लौकिकालौकिकभेदात्॥ तत्रलौ
किकप्रत्यक्षहेतुःसन्निकर्षःषड्विधः॥ संयोगः॥ संयुक्तसमवायः॥ संयुक्तसमवेतसम
वायः॥ समवायः॥ समवेतसमवायः॥ विशेषणताचेति॥ तत्रसंयोगेनद्रव्यग्रहः॥ इहघटो
स्तीति॥ चक्षुरादेर्घटादिनासंयोगसत्वात्॥ एवंमनसासंयोगेनात्मग्रहः॥ अहमस्मी ॥२॥
ति॥ संयुक्तसमवायेनगुणकर्मद्रव्यगतजातिग्रहः॥ इहघटेरूपंचलनंद्रव्यत्वादिक
मस्तीति॥ चक्षुरादिसंयुक्तेघटेरूपादीनांसमवायात्॥ संयुक्तसमवेतसमवायेनगुण

कर्मगतजातिग्रहः॥ घटगतरूपेरूपत्वादिकमस्ति॥ घटगतचलनेकर्मत्वादि
कमस्तीति॥ चक्षुरादिसंयुक्तेघटेसमवेतंरूपादिचलनंच॥ तत्ररूपत्वादेःकर्म
त्वादेश्चसमवायात्॥ समवायेनशब्दग्रहः॥ इहवीणायांशब्दोस्तीति॥ कर्णशष्कु
ल्यवच्छिन्ननभःश्रोत्रं॥ तत्रशब्दस्यसमवायात्॥ समवेतसमवायेनशब्दत्वा
दिग्रहः॥ इहशब्देशब्दत्वगुणत्वादिकमस्तीति॥ श्रोत्रसमवेतेशब्देशब्दत्वादेः
समवायात्॥ विशेषणतयासमवायाभावयोर्ग्रहः॥ तथाहि॥ विशेषणताद्वि
विधा॥ इंद्रियविशेषणता इंद्रियसंबद्धविशेषणताचेति॥ तत्रेंद्रियविशेषणत
याशब्दत्वसमवायस्यशब्दाभावस्यचग्रहः॥ इहशब्देसमवायोस्तीति॥ इहशब्दो
नास्तीति॥ श्रोत्रेंद्रियेशब्दसमवायस्यशब्दाभावस्यचविशेषणत्वात्॥ इंद्रिय
संबद्धविशेषणतयाघटादिसमवायस्यघटाद्यभावस्यचग्रहः॥ इहकपालेघटसम

वायोरिति ॥ इह भूतले घटो नास्तीति ॥ चक्षुरादिसंयुक्ते कपाले घटसमवायस्य भूतले च घ
टाभावस्य विशेषणत्वात् ॥ समवायप्रत्यक्षं वैशेषिकनैयायिकमतेन ॥ वैशेषिकमते तु समवा
योऽतीन्द्रियः ॥ अलौकिकप्रत्यक्षहेतुः सन्निकर्षस्त्रिविधः ॥ सामान्यलक्षणो ज्ञानल
क्षणो योगजधर्मश्चेति ॥ एतत्त्रितयसन्निकर्षः षडिन्द्रियसहकारी इति संप्रदायविदः ॥
मनस एव सहकारीति तु शूलपाणिमिश्राः ॥ तत्र सामान्यं ज्ञायमानमेव स्वाश्रया
णां सन्निकर्षः ॥ ज्ञायमानघटत्वसन्निकर्षेण तु घट इत्याकारकं सकलघटानां प्रत्यक्षं
जन्यते ॥ ज्ञानलक्षणासन्निकर्षेण तु तद्धर्मयोगितत्तत्पदार्थानां प्रत्यक्षं जन्यते ॥ कथ
मन्यथा कविकाव्यप्रसक्ततत्तत्पदार्थसंसर्गज्ञानं ॥ एवं सुरभि चंदनमिति चाक्षुषे
सौरभस्यापि ॥ ज्ञानं ज्ञानसन्निकर्षेण ॥ सौरभस्य चक्षुरयोग्यत्वेन चक्षुःसंयुक्तचं ॥ ६ ॥
दनसमवायस्य तत्र सत्त्वेऽप्यप्रयोजकत्वात् ॥ योगधर्मसन्निकर्षे

ण च योगिनां वस्तुमात्रस्य प्रत्यक्षं जन्यते ॥ तच्च प्रत्यक्षं षड्विधं ॥ घ्राणरसनचक्षुस्त्वक्
श्रोत्रमनोभेदात् ॥ गंधप्रत्यक्षासाधारणं कारणं घ्राणं ॥ रसनप्रत्यक्षासाधारणं का
रा२ रणं रसनं ॥ रूपप्रत्यक्षासाधारणं कारणं चक्षुः ॥ स्पर्शप्रत्यक्षासाधारणं कारणं त्वक् ॥ श
ब्दप्रत्यक्षासाधारणं कारणं श्रोत्रं ॥ सुखादिप्रत्यक्षासाधारणं कारणं मनः ॥ घ्राणादिलक्षणे
ऽसाधारणपदमात्मादिवारणाय ॥ गंधादिप्रत्यक्षं च चंदने सौरभं ॥ गुडे मधुरो रसः ॥ घटे नी
लो वर्णः ॥ जले शीतस्पर्शः ॥ वने सिंहनादः ॥ मयि सुखमित्याद्याकारकं ॥ तच्च करणत्वे
तस्य घ्राणादेर्व्यापारो घ्राणादिमनःसंयोगः ॥ मनसस्तु आत्ममनःसंयोगः ॥ न घ्राणा
देर्गंधादिप्रत्यक्षजनकत्वे परमाणुमहत्त्वादिगंधादेरपि प्रत्यक्षं स्यादिति वाच्यं ॥ महतो
गंधादयो महत्त्वसमानाधिकरणा उद्भूता एव घ्राणादियोग्याः ॥ परमाणुगंधादयस्तु
न महत्त्वसमानाधिकरणाः ॥ मण्यादिगंधादयश्च नोद्भूता इति न तत्प्रत्यक्षं ॥ एवं

योदिदेशे ~~[illegible]~~ ऽत्पन्नशब्दो वीचितरंगन्यायेन कदंबगोलकन्यायेन
वाग्रेदेशेऽत्पन्नः शब्दः श्रोत्रयोग्यः॥ तस्यैव श्रोत्रसंबंधसंभवात्॥ अत्र घ्राण
रसनश्रोत्राणि द्रव्याग्राहकाणि॥ चक्षुस्त्वगिन्द्रियमनांसि द्रव्यग्राहकाणि॥ महत्त्वो
द्भूतरूपवद्द्रव्यं चक्षुषा योग्यं॥ एवं महत्त्वोद्भूतरूपस्पर्शवद्द्रव्यं त्वचा योग्यं॥ १
२५ अत एव परमाणुवायुपिशाचादयः चक्षुषा त्वचा न गृह्यंते॥ परमाणोर्महत्त्वाभावात्॥
वायोरूपाभावात्॥ पिशाचादावुद्भूतरूपाभावात्॥ अत एव चक्षुषा त्वचा न गृह्यते॥ त
चउद्भूतस्पर्शाभावात् एवं योग्यद्रव्यसमवेताः द्रव्यत्वादिसामान्यैकसंख्यापरिमाण ४३
पृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहवेगास्तत्समवायस्तदभावश्च चक्षुस्त्वग्भ्यां
पि च योग्याः॥ जीवात्मलक्षणं द्रव्यं मनोयोग्यं॥ तत्समवेता आत्मत्वादिसामान्यबुद्धि ॥१२॥
सुखदुःखेच्छाद्वेषप्रयत्नास्तत्समवायस्तदभावश्च मनोयोग्याः॥ येनेंद्रियेण गृह्यते
यद्गृह्यते तेनेंद्रियेण १

नास्ति च पर्वतो धूमवान् वह्निमत्त्वादित्याद्यसद्धेतौ पंक्ति १०॥ ततो यत्रेत्यधस्तं॥

अ१ सामान्यं तत्समवायस्तदभावश्चेत्येतेरिति नियमादिति व्याख्यातं प्रत्यक्षं॥ ॥अ
थानुमानं निरूप्यते॥ ॥अनुमितिकरणमनुमानं॥ तच्च धूमो वह्निव्याप्य इति व्या
प्तिज्ञानं॥ वह्निव्याप्यधूमवानयमिति तृतीयलिंगपरामर्शो व्यापारः॥ ननु तृतीयत्वं कथम
स्येति चेदुच्यते॥ महानसादौ दृष्टांते वह्निधूमयोर्भूयः सहचारदर्शनात् व्याप्तिज्ञान
धूमज्ञानं प्रथमं॥ ततः पर्वतादौ धूमदर्शनं व्याप्यत्वेन तत्स्मरणं द्वितीयं॥ ततस्तत्रैव
व्याप्यत्वेन धूमस्य परामर्शो वह्निव्याप्यधूमवानयमित्येवंरूपो जायते इति तृतीयत्वं त
स्येति बोध्यं॥ लिंगज्ञानजन्यं लिंगिज्ञानमनुमितिः॥ यथा पर्वतादौ धूमज्ञानानंतरं प
र्वतो वह्निमानिति ज्ञानं॥ व्याप्तिपक्षधर्मता च लिंगं॥ ननु केयं व्याप्तिरिति चेदुच्यते
अव्यभिचरितसाध्यसामानाधिकरण्यं व्याप्तिः॥ अस्ति चेदं पर्वतो वह्निमान् धू
मवत्त्वादित्यादि सद्धेतौ॥ यत्र यत्र वह्निस्तत्र धूम इति नियमस्यासत्त्वात्॥ तत्रायःपिं
डे वह्निसत्त्वेऽपि धूमासत्त्वात्॥ व्यभिचारज्ञानविरहसहकृततद्धेतुसाध्यसहचारदर्श
यत्र यत्र धूमस्तत्र वह्निरिति नियमस्य सत्त्वात्॥ २

नव्याप्तिग्राहकं प्रत्ययमेतदिति चेत् । इष्टं ॥ हेतोः साध्याभाववद्वृत्तित्वं व्यभिचारस्तज्ज्ञाने
सति व्याप्तिग्रहाभावात् ॥ तदभावस्तत्र कारणं । हेतुसाध्ययोः सहचारदर्शनं तु अन्वय
व्यतिरेकाभ्यां तत्र कारणं । का पुनः पक्षधर्मता ॥ पक्षनामस्य पक्षवृत्तित्वं पक्षधर्मता ॥ पक्ष
ता चानुमित्साविरहविशिष्टसाध्यनिश्चयाभावः ॥ अस्ति चेदं पर्वतादौ पक्षे ॥ अनु
मित्साविरहविशिष्टसाध्यनिश्चयस्य तत्राभावात् । पर्वतादौ साध्यनिश्चये सत्य
पि सत्यां चानुमित्सायां पर्वतो वह्निमान् धूमादित्यनुमानसंभवात् तत्र पक्षता संपत्तये
अनुमित्साविरहविशिष्टत्वं साध्यनिश्चयविशेषणं ॥ तथा चानुमित्साविरह
विशिष्टसाध्यनिश्चयस्य तत्राभावात् पक्षता ॥ तच्चानुमानं त्रिविधं । केवलान्वयि
केवलव्यतिरेकि अन्वयव्यतिरेकि चेति ॥ यत्रान्वयव्याप्तिरेवास्ति तत्केवलान्वयि
यथा घटो ऽभिधेयः प्रमेयत्वादिति ॥ अत्र घटः पक्षस्तस्याभिधेयत्वं साध्यं प्रमेयत्वं
हेतुस्तस्मिन् यत्र यत्र प्रमेयत्वं तत्र तत्राभिधेयत्वं यथा घट इत्यन्वयव्याप्ति ॥११॥

रेवास्ति ॥ न तु यत्र यत्र साध्याभावस्तत्र तत्र हेत्वभाव इति व्यतिरेकव्याप्तिः ॥ अभिधेयत्व
प्रमेयत्वस्य च सर्वत्र सत्वात् ॥ साध्याभावो हेत्वभावो ऽप्रसिद्धत्वात् ॥ यत्र व्यतिरेकव्याप्ति
रेवास्ति तत्केवलव्यतिरेकि ॥ यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वादित्यादि ॥ अ
त्र जीवच्छरीरं पक्षस्तस्य सात्मकत्वं साध्यं प्राणादिमत्त्वं हेतुस्तस्मिन् यत्र यत्र सा
त्मकत्वाभावस्तत्र तत्र प्राणादिमत्त्वाभावो यथा घटादाविति व्यतिरेकव्याप्तिरे
वास्ति ॥ न तु यत्र यत्र प्राणादिमत्त्वं तत्र तत्र सात्मकत्वमित्यन्वयव्याप्तिः ॥ दृष्टान्ता
भावात् ॥ जीवच्छरीरमात्रस्य पक्षीकरणात् ॥ अन्यत्र च हेतुसाध्ययोरेवासत्त्वा
त् ॥ यत्रान्वयव्याप्तिर्व्यतिरेकव्याप्तिश्च निगद्यते तदन्वयव्यतिरेकि ॥ यथा पर्वतो व
ह्निमान् धूमादिति ॥ अत्र च पर्वतः पक्षस्तस्य वह्निमत्त्वं साध्यं धूमवत्त्वं हेतुस्त
स्मिन् यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसादावित्यन्वयव्याप्तिः ॥ एवं य

त्रयत्रवह्न्यभावस्तत्रतत्रधूमाभावोयथाजलमहाह्रदइतिव्यतिरेकव्याप्तिरस्ति॥

 अन्वयेसाधनंव्याप्यंसाध्यंव्यापकमिष्यते॥ साध्याभावोन्यथाव्याप्योव्यापकःसाधनात्ययः॥ व्या

प्यस्यवचनंपूर्वंव्यापकस्यततःपरं॥ एवंपरिकल्पिताव्याप्तिःस्फुटाभवतिनत्वतइति॥ २॥ त्रयाणांम

ध्येयोन्वयव्यतिरेकीसपंचरूपोपपन्नएवस्वसाध्यंसाधयति॥ तानिपंचरूपाणि॥ पक्षधर्म

त्वं॥ सपक्षेसत्वं॥ विपक्षाद्व्यावृत्तिः॥ अबाधितविषयत्वं॥ असत्प्रतिपक्षत्वंचेति॥ पक्षा

श्रयवृत्तित्वंपक्षधर्मत्वं॥ निश्चितसाध्यवान्सपक्षस्तत्रविद्यमानत्वं॥ सपक्षेसत्वं॥ नि

श्चितसाध्याभाववान्विपक्षस्तत्राविद्यमानत्वंविपक्षाद्व्यावृत्तिः॥ प्रमाणांतरेणाप्रमितसा

ध्याभाववत्त्वंअबाधितविषयत्वं॥ साध्याभावसाधकहेत्वंतरशून्यत्वमसत्प्रतिपक्ष

त्वं॥ एतानिपंचरूपाणिवह्निसाधकधूमादावन्वयव्यतिरेकिणिविद्यंते॥ केवलान्वयिनि

विपक्षाद्व्यावृत्तिर्नास्ति॥ विपक्षाप्रसिद्धेः॥ केवलव्यतिरेकिणिसपक्षेसत्वंनास्ति॥ सप

क्षासिद्धेः॥

त्रिविधमप्यनुमानंद्विविधं॥ स्वार्थंपरार्थंचेति॥ स्वस्यैवानुमितिहेतुःस्वार्थं॥ स्वयंधूमाद

ग्निमनुमायपरंबोधयितुंपंचावयवोपेतमनुमानवाक्यंप्रयुंक्तेतत्परार्थं॥ पंचावयवास्तुप्रति

ज्ञाहेतूदाहरणोपनयनिगमनानि॥ तत्रपक्षेसाध्यनिर्देशःप्रतिज्ञा॥ यथापर्वतोवह्निमानि

ति॥ पंचम्यंतंहेतुप्रतिपादकंवाक्यंहेतुवचनं॥ यथाधूमादिति॥ व्याप्तिप्रतिपादकंवचनमुदा

हरणं॥ यथायोयोधूमवान्सवह्निमान्यथामहानसइति॥ व्याप्तिविशिष्टस्यहेतोःपक्षधर्म

ताप्रतिपादकंवचनमुपनयनं॥ यथायंवह्निव्याप्यधूमवानिति॥ अबाधितत्वासत्प्र

तिपक्षितत्वज्ञापकंवाक्यंनिगमनं॥ यथातस्माद्वह्निमानिति॥ तस्मात्वायमित्युपनयस्यत

स्मात्तथेतिनिगमनस्यशरीरमितिसंप्रदायः॥ व्यतिरेकिणिप्रतिज्ञाहेतूतुल्यावेव॥ उदाहरणोपन

यनिगमनानितुभिद्यंते॥ यथाजीवच्छरीरंसात्मकंप्राणादिमत्त्वादित्यत्रयत्सात्मकंनभवति

तत्प्राणादिमन्नभवतियथाघटः॥ नचेदंजीवच्छरीरंतथा॥ प्राणादिमन्नभवति॥ तस्मान्नेन

येति॥ ॥अथहेत्वाभासाः॥श्री॥ अनुमितितत्करणान्यतरप्रतिबंधकज्ञानविषयधर्मो
हेत्वाभासत्वोपाधिस्तद्वान्हेत्वाभासः॥ तेचानैकांतिकविरुद्धसत्प्रतिपक्षासिद्धबाधि
ताःपंच॥ तत्रसव्यभिचारोनैकांतिकः॥ सत्रिविधः॥ साधारणोऽसाधारणोऽनुपसंहारी
चेति॥ तत्रसपक्षविपक्षवृत्तिः साधारणः॥ यथापर्वतोधूमवान्वह्नेरिति॥ वह्नेः
सपक्षे महानसेविपक्षेचतप्तायःपिंडेवर्त्तनेऽतःसाधारण्यं॥ एतद्ज्ञानंचविपक्ष
वृत्तित्वरूपव्यभिचारविषयात्मकत्वाद्व्यभिचारज्ञानविधयाव्याप्तिग्रहप्रतिबंधकं॥
व्यभिचारज्ञानेसतिव्याप्तिग्रहानुदयस्यसर्वानुभवसिद्धत्वात्॥ सपक्षविपक्षव्याव
त्तत्वेसतिपक्षवृत्तिरसाधारणः॥ यथाशब्दोनित्यःशब्दत्वादिति॥ शब्दत्वंहिसप
क्षाद्गगनादेर्विपक्षाद्घटादेर्व्यावृत्तंपक्षेचशब्देवर्त्ततेऽतःसाधारण्यं॥ एत
ज्ज्ञानंचसाक्षादनुमितिप्रतिबंधकं॥ कथमितिचेत्॥ इत्थं॥ शब्दत्वहेतुर्नान्वयीहेतुः॥
दृष्टांताभावात्॥ किंतुव्यतिरेकी॥ तथाच॥ योयद्वतोव्यावृत्तःसस्वाश्रयेतदभाव ॥१२॥

साधयति॥ यथाधूमोवह्न्यभाववतोजलह्रदादेर्व्यावृत्तःस्वाश्रयपर्वतादौवह्न्यभावाभावंसा
धयति॥ तथाशब्दत्वंनित्यत्ववतोगगनादेःसपक्षाद्व्यावृत्तमितिस्वाश्रयेशब्देनित्यत्वाभाव
मनित्यत्वंसाधयेत्॥ नचैकत्रशब्देनित्यत्वानित्यत्वयोःसिद्धिःसंभवति॥ तयोर्विरोधात्॥
तस्माच्छब्दत्वेऽसाधारण्यज्ञानंप्रतिसाध्यानुमितिरिति॥ वस्तुमात्रपक्षकोऽनुपसंहारी॥
यथासर्वमनित्यंप्रमेयत्वादिति॥ अत्रसर्वस्यैवपक्षत्वात्प्रमेयत्वहेतुरनुसंहारी॥ एतज्
ज्ञानमपिव्याप्तिग्रहप्रतिबंधकं॥ सर्वस्यपक्षत्वेव्याप्तिग्राहकसहचारदर्शनस्याभा
वेनसहचारनिश्चयाभावेसतिव्याप्तेरनिश्चयात्॥ साध्याभावव्याप्तोहेतुर्विरुद्धः॥
यथायंगौरश्वत्वादिति॥ अत्रचयत्राश्वत्वंतत्रतत्रगोत्वाभावइतिसाध्याभावव्याप्तेःसत्वाद
स्यहेतुर्विरुद्धः॥ एतज्ज्ञानंचसाक्षादनुमितिप्रतिबंधकं॥ गोत्वाभावव्याप्याश्वत्ववताइ
नेस्मिन्गोत्वनिश्चयासंभवात्॥ साध्याभावसाधकहेत्वंतरप्रतिपक्षस्तद्वान्सत्प्रतिपक्षः॥
यथापर्वतोवह्निमान्धूमात्महानसवत्॥ सवह्न्यभाववान्पाषाणमयत्वात्कुड्यवदिति॥

अत्र च द्वयोरपि हेत्वोः परस्परसाध्याभावसाधकत्वान्निश्चयः सत्प्रतिपक्षत्वं ॥ एतज्ज्ञानं च सा
ध्यानुमितिप्रतिबंधकं ॥ वह्निव्याप्यधूमवान् वह्न्यभावव्याप्यवांश्च पर्वत इति द्विविधपरामर्शे
सति एकस्मादप्यनुमितेरभावः परस्परप्रतिबंधात् ॥ परामर्शप्रतिबंधकज्ञानविषयो धर्मो
ऽसिद्धिस्तद्वानसिद्धः ॥ स त्रिविधः ॥ आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति ॥ तत्र प
क्षतावच्छेदकाभाववत्पक्षक आश्रयासिद्धः ॥ यथा गगनारविंदं सुरभि अरविंदत्वात्
सरोजारविंदवदिति ॥ अत्र च अरविंदपक्षे गगनीयत्वं पक्षतावच्छेदकं नास्तीत्यरविंदत्वहे
तुराश्रयासिद्धः ॥ एतज्ज्ञानं परामर्शप्रतिबंधकं ॥ अरविंदे गगनीयत्वं नास्तीति ज्ञाने सुरभि
त्वव्याप्यारविंदत्ववद्गगनारविंदमिति परामर्शासंभवात् ॥ एतस्यारविंदे गगनीयत्वसंबं
धावगाहित्वात् ॥ पक्षनिष्ठाभावप्रतियोगी स्वरूपासिद्धः ॥ यथा ह्रदो द्रव्यं धूमादिति ॥ अ
त्र च पक्षे ह्रदे धूमस्याभावोऽस्तीति धूमो हेतुः स्वरूपासिद्धः ॥ एतज्ज्ञानमपि पराम
र्शप्रतिबंधकं ॥ ह्रदे धूमो नास्तीति ज्ञाने द्रव्यत्वव्याप्यधूमवान् ह्रद इति परामर्शासं ॥२६॥

भवात् ॥ एतस्य ह्रदे धूमसंबंधावगाहित्वात् ॥ व्याप्यतावच्छेदकाभाववान् हेतुर्व्याप्यत्वा
सिद्धः ॥ यथा पर्वतो वह्निमान् कांचनमयधूमादिति ॥ अत्र च धूमे व्याप्यतावच्छेदकत्वेना
भिमतं कांचनमयत्वं नास्तीति धूमो हेतुर्व्याप्यत्वासिद्धः ॥ एतज्ज्ञानमपि परामर्शप्रतिबं
धकं ॥ धूमे कांचनमयत्वं नास्तीति ज्ञाने सति वह्निव्याप्यकांचनमयधूमवान् पर्वत इति
परामर्शासंभवात् ॥ एतस्य धूमे कांचनमयत्वसंबंधावगाहित्वात् ॥ साध्याभावव
त्पक्षको बाधितः ॥ यथा वह्निरनुष्णः पदार्थत्वात् जलवदिति ॥ अत्र च वह्नौ पक्षे अनु
ष्णत्वाभावस्योष्णत्वस्य च त्वगिंद्रियेण निश्चयात्पदार्थत्वं हेतुर्बाधितः ॥ एतज्ज्ञानं सा
ध्यानुमितिप्रतिबंधकं ॥ वह्नावनुष्णत्वं नास्तीति ज्ञाने सति वह्निरनुष्ण इत्यनुमितेरसंभ
वात् ॥ तदभाववत्तौ विकल्पनिर्णयस्य तज्ज्ञाने सप्र●तिबंधकत्वात् ॥ ॥ इति हेत्वाभा
साः ॥ ॥ ननु पाधयेरपि हेतुदोषत्वात्सोपाधिकोऽपि हेत्वाभासोऽस्तीति वयंपर्यवतेइ

ति चेन्न। व्यभिचारादिज्ञानस्येवोपाधिज्ञानस्यापि तत्तत्कारणान्तरप्रतिबन्धकता
भावेनोपाधेर्हेतुदोषत्वाभावात्। कथं तर्हि वाद्यनुमाने उपाधिरुपन्यस्यत इति चेत्॥ व्य
भिचारज्ञानप्रयोजकत्वेन तत्र तदुपन्यासात्॥ अथ कोयमुपाधिरिति चेदुच्यते॥ साध्य
व्यापकत्वे सति साधनाव्यापक उपाधिः। यथा धूमवान् वह्नेरित्यत्रार्द्रेन्धनं॥ भवति च तत्त
साध्यस्य धूमस्य व्यापकं॥ यत्र यत्र धूमस्तत्रार्द्रेन्धनमिति सत्वात्॥ भवति च साधनस्य
वह्नेरव्यापकं॥ यत्र वह्निस्तत्रार्द्रेन्धनमित्यसत्वात्॥ तप्तायःपिंडे वह्निसत्वेप्यार्द्रेन्धना
भावात्॥ एवं यागीयपशुहिंसा अधर्मसाधनं ~~साध्यस्य व्यापकं~~ हिंसात्वात्॥ क्रतु
बाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः॥ भवति च तत् अधर्मसाधनत्वं साध्यस्य
व्यापकं॥ यत्र यत्राधर्मसाधनत्वं तत्र तत्र निषिद्धत्वमिति सत्वात्॥ भवति च सा
धनस्य हिंसात्वस्याव्यापकं॥ यत्र यत्र हिंसात्वं तत्र तत्र निषिद्धत्वमित्यसत्वात्॥ ॥४९॥

पशुहिंसायां हिंसात्वसत्वेपि निषिद्धत्वस्यासत्वात्॥ एवं गर्भस्थो मित्रातनयः श्यामो मित्रा
तनयत्वात्॥ दृश्यमानमित्रातनयवदित्यत्र शाकपाकजत्वमुपाधिः॥ न च श्या
मत्वस्य काकादौ सत्वे शाकपाकजत्वाभावात्साध्याव्यापकत्वं॥ काकादिव्यावृत्तश्याम
त्वस्यैवात्र साध्यत्वात्॥ ॥इत्यनुमाननिरूपणं॥ ॥अथोपमानं निरूप्यते॥ ॥त
त्रोपमितिकरणमुपमानं॥ आ॥ तच्च सादृश्यज्ञानात्मकं॥ उपमितित्वजातिमत्युपमितिः
कथमियमुत्पद्यत इति चेत्। उच्यते॥ गवयमजानन् कश्चिन्नागरिकः कंचिद्वनचरं कीदृ
शो गवयपदवाच्य इति पृच्छति॥ ततस्तेन गोसदृशो गवयपदवाच्य इत्युत्तरितः॥ स कदा य४
चिद्वनं गतो गोसदृशं पिंडं पश्यन् प्राग्युक्तातिदेशवाक्यार्थं स्मरति॥ अनन्तरं असौ गवयपद
वाच्य इति प्रतिपद्यते सा उपमितिः॥ अगो सादृश्यज्ञानं करणं॥ अतिदेशवाक्यार्थस्मर
णं व्यापारः॥ असौ गवयपदवाच्य इति फलं॥ ॥इत्युपमाननिरूपणं॥ ॥अथ

त्र२ ज्ञा नं २

शब्दो निरूप्यते॥ ॥शाब्दप्रमाकरणज्ञानविषयः शब्दः॥ यथा नद्यास्तीरे पंचफलानि संतीत्यादि
वाक्यार्थगोचरयथार्थज्ञानं शाब्दप्रमा॥ अन्वयज्ञानं करणं॥ पदजन्यपदार्थोपस्थितिर्व्यापा
रः॥ पदोपस्थितानां पदार्थानां मिथः संसर्गो वाक्यार्थः॥ पदसमूहो वाक्यं॥ अर्थवान् पदं
तच्च द्विविधं॥ मुख्यगौणभेदात्॥ यत्र शक्त्या स्वार्थमुपस्थापयति तत्र स्वार्थे मुख्यं॥ य
था गोघटादिव्यक्तिमुपस्थापयत् गोघटादिपदं॥ अस्मात्पदादयमर्थो बोधव्य इत्याकारको नादि
संकेतः शक्तिः॥ यच्च लक्षणया स्वार्थं यन्नर्थमुपस्थापयति तत्तस्मिन्नर्थे गौणं लाक्षणि
कमित्युच्यते॥ यथा गंगायां घोषः इत्यत्र तीरोपस्थापकं गंगापदं॥ शक्यसंबंधो
लक्षणा॥ यथा गंगापदे प्रवाहः शक्यः तस्य तीरस्य संयोगसंबंधो गंगापदलक्ष
णा॥ तस्य च शाब्दस्याकांक्षा योग्यता सन्निधयः सहकारिणः॥ यस्य पदस्य ये
न पदेन विनाऽन्वयानुभवजनकत्वं नास्ति तस्य पदस्य तेन पदेन समभिव्याहार ॥१५॥

रः आकांक्षा॥ यथा घटमानयेत्यादौ कारकपदस्य क्रियापदेन विना घटकर्मत्वमित्यन्वया
नुभवजनकत्वाभावात् कारकपदस्य क्रियापदेन साकांक्षा॥ एवं क्रियापदस्य कारक
पदेनापि साकांक्षा॥ अत एव गौरश्वः पुरुषो हस्तीत्यादौ नान्वयबोधः॥ आकां
क्षाविरहात्॥ एकपदार्थेऽपरपदार्थसंसर्गो योग्यता॥ यथा पयसा सिंचती
त्यादौ पयःपदार्थे सेकसंसर्गस्य कार्यकारणभावलक्षणस्य संबाधो योग्य
ता॥ अत एव वह्निना सिंचतीत्यादौ नान्वयबोधः॥ योग्यताविरहात्॥ पदाना
मव्यवधानं सन्निधिः॥ यथा गामानयेत्यादौ पदानामविलंबेनोच्चारणं स
न्निधिः॥ अत एव एकैकशः प्रहरे प्रहरेऽसहोच्चारितगामानयेत्यादौ नान्वयबो
धः॥ सन्निधेरभावात्॥ सोऽयं शाब्दस्त्रिविधः॥ विधिनिषेधार्थवादभेदा
त्॥ तत्र प्रवर्तकपरं वाक्यं विधिः॥ यथा ज्योतिष्टोमेन स्वर्ग

तत्र प्रवृत्तिपरवाक्यं विधिः॥ यथा ज्योतिष्टोमेन स्वर्गकामो यजेत॥ ओ-
दनकामस्तंडुलं पचेत॥ इत्यादि॥ ज्योतिष्टोमनामको यागः स्वर्गरू-
पेष्टसाधनं॥ तंडुलकर्मकः पाकः ओदनरूपेष्टसाधनमित्युक्तयवाक्या-
र्थः॥ यजेत पचेतेत्यादि विधिप्रत्ययेनेष्टसाधनत्वोपस्थापनात्॥ निवृ-
त्तिपरवाक्यं निषेधः॥ यथा न कलंजं भक्षयेदिति॥ कलंजभक्षणं नेष्टविरो-
धसाधनमिति वाक्यार्थः॥ इष्टविरोधश्चात्र पापानुत्पत्तिरेव॥ तयोरेव वाक्य- ॥१७॥
तात्पर्यात्॥ विधिनिषेधभिन्नः शब्दोऽर्थवादः॥ यथा आदित्यो यूप इत्यादि॥ स
सचायं शब्दो लोके वेदे च समानः॥ इयांस्तु विशेषः॥ किंतु लौकिकवाक्यप्रमाणं यदाप्तो-
क्तं॥ वेदवाक्यं तु सर्वमपि प्रमाणं॥ परमाप्तेन भगवतोक्तत्वादिति॥ इति शब्दनिरूपणं॥

अर्थापत्तिस्तु प्रमाणांतरं॥ पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा दिवाऽभोजिनो रात्रिभोजन-
मंतरेण पीनत्वमनुपपन्नमिति ज्ञानानंतरं देवदत्तो रात्रौ भुंक्ते इति निर्णीयते॥ तस्य व्यतिरेकिसा-
ध्यत्वात्॥ तथाहि॥ देवदत्तो रात्रौ दिवाऽभुंजानत्वे सति भुंक्ते पीनत्वात्॥ यस्तु रात्रौ न भुंक्ते स
दिवाऽभुंजानत्वे सति पीनो न भवति॥ यथा दिवा रात्रौ चाभोजीति॥ अर्थापत्तिरियमपि व्यतिरेकिण
एव नामांतरमिति॥ घटोपलब्धौ घटाभावाग्रहस्य तद्योग्यानुपलब्धिरूपाभावग्रहे प्रमाणस्य
व्यतिरेकिणि नतु प्रमाणांतरं॥ प्रत्यक्षेणैवाभावग्रहोपपत्तेः॥ अन्यथेह घटो नास्तीति
निर्णयानंतरमिह घटाभावं साक्षात्करोमीति प्रतीत्यनुपपत्तेः॥ पुरासत्वपक्षेण भोजी दि-
शानेन ज्ञाते तत्र स्वत एव यथार्थज्ञानत्वरूपं प्रामाण्यमवधार्य जनो प्रवर्त्तते॥ ज्ञानग्रहे
तद्गतप्रामाण्यस्यापि ग्रहात्॥ प्रामाण्यस्य यावद्ज्ञानग्राहकग्राह्यत्वं स्वरूपं स्वतस्त्वापगमा-
दिति मीमांसकाः॥ तन्न॥ स्वत एव प्रामाण्यग्रहे ज्ञानग्रहानंतरं घटविज्ञातं मे जातं ज्ञानं प्रमा
न वेति प्रामाण्यसंशयो न स्यात्॥ निश्चिते संशयायोगात्॥ न च संशयस्थले ज्ञानग्रहे

पिनाम्नीतिवाच्यं॥ज्ञानाग्रहेज्ञानधर्मिकप्रामाण्यतदभावकोटिकसंशयानुपपत्तेः॥संश
यधर्मिज्ञानस्यहेतुत्वात्॥नहिपुरोवर्त्तिनिस्थाणुत्वेपुरुषधर्मिण्यज्ञातेऽयंस्थाणुःपुरुषोवे
तिसंशयोभवति॥तस्मात्ज्ञानेपरतएवप्रामाण्यमवधार्यते॥तथाहि॥अनभ्या
सदशापन्नजलादिज्ञानेजातेतत्प्रामाण्यसंशयेसत्यपिपुरुषःप्रवर्त्तते॥ततोजलप्रा
प्तौसत्यांज्ञानंमेजलस्थाने॥प्रमासमर्थप्रवृत्तिजनकत्वात्॥यत्प्रमानभवतितन्नसम
र्थप्रवृत्तिजनकंनभवति॥यथाऽजलेजलमितिव्यतिरेकिणा॥अनभ्यासदशापन्नेज्ञानेप्रामाण्य
निश्चीयतइति॥अभ्यासदशापन्नजलादिज्ञानेतुप्रवृत्तेःपूर्वमपिअन्वयिनाप्रामाण्यमव
धार्यते॥तथाहि॥तत्रैवंविधोत्पत्तिकादिजलज्ञानंप्रमासमर्थप्रवृत्तिजनकजातीयत्वात्॥प्राग्
जलज्ञानवदिति॥धर्ममाह॥धर्मश्चसुखं॥अधर्मश्चदुःखं॥इच्छात्वसामान्यवतीइच्छा॥सा
द्विधा॥फलविषयिणी॥तत्साधनविषयिणीचेति॥सुखंदुःखाभावश्चफलं॥तत्रेच्छां ॥१३॥
प्रतिफलज्ञानमात्रंकारणं॥साधनेच्छांप्रतितुफलेच्छासाधनताज्ञानंकारणं॥द्वेषत्वसा

मान्यवान्द्वेषलक्षणं॥सद्वेषः॥सद्विविधः॥दुःखविषयस्तत्साधनविषयश्च॥दुःखद्वेषंप्रतिदुः
खज्ञानमात्रंकारणं॥साधनद्वेषंप्रतिदुःखसाधनतादुःखंकारणं॥प्रयत्नत्वसामान्य
वान्सामान्यरूपःप्रयत्नः॥सत्रिविधः॥प्रवृत्तिनिवृत्तिजीवनयोनिभेदात्॥चिकीर्षा
जन्योप्रयत्नःप्रवृत्तिः॥द्विष्टसाधनताज्ञानजन्यायत्नोनिवृत्तिः॥श्वासप्रश्वास
हेतुर्यत्नोजीवनयोनिः॥सचातीन्द्रियः॥बुद्ध्याद्याप्रयत्नाः॥आत्ममात्रसमवेताः॥तत्रैश्व
रगतानित्याः॥जीवगताअनित्याः॥आद्यपतनासमवायिकारणंगुरुत्वं॥तच्चभू
जलमात्रवृत्ति॥आद्यस्यन्दनासमवायिकारणंद्रवत्वं॥तच्चद्विविधं॥सांसिद्धिकंनैमि
त्तिकंच॥अग्निसंयोगानपेक्षंद्रवत्वंसांसिद्धिकं॥तज्जलमात्रवृत्ति॥अग्निसंयोगापेक्ष
द्रवत्वंनैमित्तिकं॥तच्चघृतादिरूपायांपृथिव्यांसुवर्णादिरूपेचतेजसि॥तद्भस्मयत्रैवबह्नि
संयोगादनुवृत्तिःसत्तैः॥स्नेहत्वजातिमान्गुणविशेषःस्नेहः॥सजलमात्रवृत्तिः॥च
[illegible]॥घृततैलादौस्नेहोपलंभस्तुजलोपाधिकः॥गुरुत्वद्रवत्वस्नेहाःप

परमाणुगतानि सा॥ कार्यगता अनित्या॥ श्रोत्रग्राह्यो गुणः शब्दः॥ स त्रिविधः॥ संयो
गजो विभागजः शब्दजश्चेति॥ भेर्याभिहन्यमानायां शब्दः संयोगजः॥ तत्र भेर्या
काशसंयोगोऽसमवायिकारणं॥ भेरीदण्डसंयोगो निमित्तकारणं॥ वंशे पाट्यमाने पटपट
चटाशब्दः स विभागजः॥ तत्र वंशदलद्वयाकाशविभागोऽसमवायिकारणं॥ वंशदल
द्वयविभागो निमित्तकारणं॥ वीचितरंगन्यायेन कदम्बगोलकन्यायेन वा ये द्वितीया
दयः शब्दाः स शब्दजः॥ तत्रोत्तरोत्तरशब्दे पूर्वपूर्वशब्दोऽसमवायिकारणं॥ अनु
कूलवातादि निमित्तकारणं॥ पुनरपि शब्दो द्विविधः॥ वर्णात्मको ध्वनिश्च॥ ताल्वा
दिव्यापारप्रभवो वर्णात्मकः॥ मृदंगादिप्रभवो ध्वनिः॥ सर्वोऽपि शब्दः आकाशमात्र
समवेतः॥ जीवात्मसमवेतबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः शब्दश्चाद्यक्षणाव
स्थायिनस्तृतीयक्षणे नश्यन्ति॥ योग्यविभुविशेषगुणानां स्वद्वितीयक्षणोत्प ॥१२॥
न्ननाश्यत्वनियमात्॥ विहितक्रियासाध्यो धर्मः॥ निषिद्धक्रियासाध्योऽधर्मः॥

एतौ जीवमात्रसमवेतौ॥ भोगप्रायश्चित्तादिनाश्यौ च॥ संस्कारत्वजातिमान् संस्का
रः॥ स त्रिविधः॥ वेगः स्थितिस्थापको भावना चेति॥ वेगत्वजातिमान् वेगः॥ स मूर्त
द्रव्यमात्रसमवेतः॥ आश्रयपूर्वावस्थापादकः संस्कारः स्थितिस्थापकः॥ स पृथि
व्यादिचतुष्टयवृत्तिः॥ आत्मस्थस्तत्स्मरणस्वादोपुनस्तस्य स्मृतिं जनयन्नेति॥ इयं
योक्रियाजन्यो ऽस्वजन्यक्रियानाश्यो च॥ पूर्वानुभवजन्यः स्मृतिहेतुः संस्कारो भा
वना॥ सा जीवमात्रवृत्तिः॥ त्रिविधसंस्कारनिरूपणं॥ इति गुणनिरूपणं॥ ऊर्ध्वदेशसंयो
गहेतुः कर्म उत्क्षेपणं॥ अधोदेशसंयोगहेतुः कर्म अपक्षेपणं॥ स्वसन्निकृष्टसं
योगहेतुः कर्म आकुंचनं॥ स्वविप्रकृष्टसंयोगहेतुः कर्म प्रसारणं॥ गमनत्वजातिम
द्गमनं॥ पंचविधमपि तत्कर्म मूर्तद्रव्यमात्रसमवेतमनित्यमेव॥ उत्तरसंयोगाद्वा क्वचिदाश्र
यनाशाद्वा नश्यति॥ इति कर्मनिरूपणं॥ अधिकदेशवृत्ति सामान्यं परं॥ यथा स
त्ता॥ द्रव्यादित्रितयवृत्तित्वेन सामान्यापेक्षया॥ अधिकदेशाभावात्॥ परम्परा

सामान्यमपरं॥ यथाद्रव्यत्वगुणत्वकर्मत्वादि॥ सत्तापेक्षयाऽल्पदेशवृत्तित्वात्॥ पुनः सामा
न्यं द्विविधं॥ जातिरूपमुपाधिरूपंच॥ साद्यं सखण्डसामान्यं जातिः॥ यथासत्ताद्रव्यादि॥ परंपरासं
बद्धसामान्यमुपाधिः॥ यथाप्रमेयत्वज्ञेयत्वादिः दण्डित्वकुण्डलित्वादिश्च॥ समवायेन वह्निपरंपरा
संबंधेन घटादिनिष्ठं प्रमेयत्वमित्यादि बोध्यं॥ इति सामान्यनिरूपणं॥ नित्यद्रव्यवृत्तयो विशे
षाणः समवायस्य च विशेषणो विनाशो नावा सामान्यलक्षणमेव पर्वोक्तमवसेयं॥ परंतु वि
शेषानंगीकुपगमे समानजातिगुणक्रियावतः परमाणोर्नोपरस्परव्यावृत्तिबुद्धिर्न स्यात्॥
तत्रेष्टापत्तौ योगिनोपि तादृशपरमाणौ ज्ञानसंकरः स्यादिति॥ अयुतसिद्धयोः सं
योग इवायुतसिद्धयोः समवायः प्रावश्यकः॥ ययोर्द्वयोर्मध्ये एकमविनश्यद् पराश्रितमे
वावतिष्ठते तावयुतसिद्धौ॥ एतौ च पंचविधौ॥ अवयवावयविनौ॥ गुणगुणिनौ॥ क्रि ॥२०॥
याक्रियावंतौ॥ जातिव्यक्ती॥ विशेषनित्यद्रव्ये चेति॥ अवयवादयो द्वि प्रविनश्यन्तो व
वयवाद्याश्रिता एवावतिष्ठंते॥ अवयवादिनाशानंतरं विनश्यंतस्तु क्षणमात्रं निराश्रि

ता एवावतिष्ठंते इति॥ इति विशेषसमवाययोर्निरूपणं॥ तादात्म्यसंबंधावच्छिन्नप्रतियोगिता
कोऽभावोऽन्योन्याभावः॥ स च घटः पटो नेति प्रत्ययसिद्धः॥ अन्योन्याभावभिन्नोऽभाव
संसर्गाभावः॥ स त्रिविधः॥ प्रागभावः प्रध्वंसाभावोऽत्यंताभावश्चेति॥ उत्पत्तेः प्राक् समवा
यिकारणे कार्यस्य संसर्गाभावः प्रागभावः॥ स चेतस्मिन् कपाले घटो भविष्यतीति प्रत्ययसि
द्धः॥ उत्पत्तेरनंतरं समवायिकारणे कार्यस्य संसर्गाभावः प्रध्वंसः॥ स च कपाले घटो ध्व
[illegible] स्त इति प्रत्ययसिद्धः॥ त्रैकालिकः संसर्गाभावोऽत्यंताभावः॥ स चेदानीं तत्र घटो नास्तीत्या
दिप्रत्ययसिद्धः॥ एवमन्येषामत्रैवांतर्भावः॥ यथांधकारस्यालोकाभावे॥ यत्रालोकेन
[illegible] तत्रांधकारव्यवहारात्॥ लक्षणदोषाणामव्याप्त्यतिव्याप्त्यसंभवानां तु यथा
[illegible] त्याभासेष्वंतर्भावः॥ लक्ष्यैकदेशे लक्षणस्यावर्तनमव्याप्तिः॥ यथा शिखावत्त्
वान् ब्राह्मण इति लक्षणस्य संन्यासिन्यभावाद व्याप्तिः॥ तस्य शिखावत्त्वाभा
वात्॥ अलक्ष्ये लक्षणगमनमतिव्याप्तिः॥ यथा मनुष्यो ब्राह्मण इति लक्षणस्य
शूद्रेऽतिव्याप्तिः॥ तस्यापि मनुष्यत्वात्॥ लक्ष्ये क्वापि लक्षणस्यावर्तनमसंभवः॥

मध्याशुद्धत्ववान्ब्राह्मण इति लक्षणस्यासंभवः॥ कस्यापि ब्राह्मणस्य शुद्धत्वाभावा
त्॥ गतदोषरहितत्वं तल्लक्षणं॥ विशुद्धमातापितृजन्यत्ववान् ब्राह्मण इति विशुद्ध
...मोधिकारत्वे॥ इयता प्रबंधेन सर्वेषां पदार्थानामुद्देशलक्षणे कृते॥ बालानुपप
...धेहान कृता॥ लक्षणतावच्छेदकमात्रेण लक्षणसंकीर्तनेनमुद्देशः॥ लक्षणं असाधारण
...लक्षणं॥ उद्देशलक्षणयोरुपपत्त्यनुपपत्तिनिर्णयानुकूलो विचारः परीक्षा॥ न
...ज्ञानमितत्पदार्थनिरूपणं॥ तज्जन्यपदार्थतत्त्वज्ञानस्य दुःखदुःखाभाव
...साधनत्वेन प्रयोजनत्वाभावादिति चेन्न॥ पदार्थतत्त्वज्ञानस्यात्मतत्त्वज्ञान
द्वारा मोक्षसाधनत्वात्॥ आत्यंतिकदुःखध्वंसो मोक्षः॥ तच्च समानाधिकरण मर१॥
दुःखासमानकालीनदुःखध्वंसः॥ संसारकालीनदुःखध्वंसस्य मोक्षत्ववारणा
यकालीनांतदुःखध्वंसविशेषणं॥ अस्मदीयदुःखसमानकालीनमुक्तमोक्षे न२
व्याप्तिवारणाय समानाधिकरणेति॥ दुःखविशेषणमिति सर्वं शिवं॥ विद्ध...